This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

८३३९

सौ·क·४ ॥श्रीगणेशायनमः॥ गुरोःकटाक्षवीक्षाख्यांदीक्षांप्राप्यतुयत्कृपां साधकःशिवरूपस्यात्तामंबांसंश्रयेत्सदा १ अथपूर्वोक्तानुष्ठानयोग्यतासि-
१ द्धयेदीक्षाविधिर्निरूप्यते शांतोह्यलुब्धःसदयःसुकुलागमतत्ववित् पूर्वाश्रमीपरोवर्णःशूद्रोनैवगुरुर्भवेत् २ स्यान्नैष्ठिकब्रह्मचारीस्त्री-
चापितुसभर्तृका गुरुरेवंविधःप्रोक्तःतत्ववित्तत्रचोत्तमः २ दृढभक्तियुतःशांतःऋजुरुत्साहीह्यलुब्धकः दीर्घसेवायुतःस्वच्छस्वांतशिष्योभवे-
च्छुभः ३ वैशाखेकार्त्तिकेचांत्येमाघेश्रावणकेशुभा मार्गशीर्षेचाश्विनेचचैत्रेमध्याप्रकीर्तिता ४ आषाढज्येष्ठयोहीनापौषभाद्रेमखेन-
हि द्वितीयाचतृतीयाचपंचमीसप्तमीतथा ५ पक्षद्वयेप्रशस्तास्युर्दशम्यादित्रयंसिते चतुर्दश्यष्टमीकृष्णेरविसोममहीसुते ६ सप्तम्यमाच-
तुर्दश्यःशुभाःपर्वशतैःसमाः त्रयोदशीपूर्णमासीचाष्टमीचचतुर्दशी ७ षष्ठीशुक्लेमध्यमास्युरन्यानिंद्याभवंतिवै बुधादित्रितयंश्रेष्ठंशु-
क्लेसोमस्तथैवच ८ मध्यमोभानुवारःस्यादन्येसर्वेचनिंदिताः अश्विनीरोहिणीचार्द्रापुष्यहस्तोत्तरात्रयं ९ स्वातीश्रवणरेवत्यःश्रेष्ठामृगपु-
नर्वसू मघाचित्राह्यनूराधामध्याज्येष्ठाचमूलकं १० विशाखाचधनिष्ठाचाप्यभिजिच्छततारका अधमान्यावर्जनीयादीक्षाकर्मविदास-
दा ११ आयुष्मत्प्रीतिसौभाग्यसुकर्मशुभशोभनाः वरीयान्हर्षणःसिद्धिःधृतिवृद्धिध्रुवाशिवः १२ ब्रह्मऐंद्रस्तथासिद्धःयोगास्त्वेतेशु-
भावहाः विष्टिंशकुन्यादिकंचत्यक्त्वाकरणंकंशुभं १३ मेषकर्कतुलाकन्याकुंभालिमकरेषुसत् आमध्यान्हादुत्तमास्यादासायान्हात्तुमध्य-
मा १४ रजन्यांतुनिषिद्धास्याद्दुष्टयोगादिकंत्यजेत् त्रिषडेकादशेलग्नात्पापालग्नेचतुर्थके १५ सप्तपंचनवस्थानेदशमेचशुभग्र-
हाः संशुद्धेचाष्टमेलग्नेचंद्रताराबलान्विते १६ त्रिषड्दशैकादशकेलग्नेचंद्रःशुभावहः नवपंचद्वितीयेषुसितेचंद्रःप्रश-
स्यते १७ द्विचतुःषडष्टनवतारकाश्चशुभावहाः वृद्धास्तबालभावौचगुरुशुक्रौविनिंदितौ १८ मेषवृश्चिकसिंहस्थेगुरौ
दीक्षापिनिंदिता क्षयवृद्धितिथौवेदानध्यायोत्पातयुक्तिथ्यो १९ संध्यागर्जितनिर्घोषभूकंपोल्कोपरागके ग्रहणात्पूर्वपर- शिवः
योःविघ्नाशेचागमेनहि २० पवित्रदमनारोपेयुगादौविषुवायने माघचैत्रसितेपंचनवतिथ्योश्चमार्गके २१ पौर्णिमायांवासु १

Accession No: -0 ~~7336~~ M1200

Title:- सौभाग्यकल्पद्रुम

Author:- माधवानन्दनाथ

subject:-

Date:- स. 1920

पे॰ -⑳

①

Checked 2012

१ देवाश्म्यां च नवरात्रके तिथ्यादि न विचार्यं स्याद्ग्रहणाद्धिकपर्वसु २२ नक्षत्रत्रयसंपातादिषु चैवं प्रकीर्त्तितं एवमुक्तप्रकारेण शुभदिनं विचार्य चिरकालसंसेवितगुरोर्दीक्षां गृह्णीयात् सा च द्विधा आचारसंस्कारभेदात् एतयोरेव नामांतरं सबीजा निर्बीजा चेति पुनरपि द्विधा संक्रमणासंक्रमणभेदात् अनयोरप्याचार्यदीक्षा साधकदीक्षेति नामांतरं पुनरियं श्रीविद्यायां चतुर्विधा बालादीक्षा पंचदशीदीक्षा मंत्रदीक्षा पूर्णदीक्षाभेदात् तत्रोपासकस्य यथाशक्ति यावदनुष्ठानाचरणायाचाररूपा १ मूढाशक्तादीनां संस्काररूपा २ शिष्येषूपदेशनयोग्यतापादिका संक्रमा १ स्वात्ममात्रोपयोगिनीत्यसंक्रमा २ बालापंचदश्योर्दीक्षैककलशस्थापनपूर्वकसांगतत्तद्विद्योपदेशरूपा ४ मंत्रदीक्षा तु कलशनवकस्थापनपुरस्सरं सांगषोडश्युपदेशः पूर्णदीक्षां तु गुर्वंतरानाश्रयनिमित्तभूताखिलमंत्रप्रापिका च तत्रादौ पूर्णदीक्षाविधिर्लिख्यते ॥ तत्र विविक्ते शुभे मंडपादौ गृहाभ्यंतरे वाऽष्टचत्वारिंशदंगुलविस्तृतां षोडशांगुलोच्छ्रितां चतुस्त्रिंशदंगुलविस्तृतां द्वादशांगुलोच्छ्रितां वा समत्रिमेखलामादर्शतलोपमां समप्रमाणां वेदिकां कृत्वा तत्र नवयोनिगर्भितं सर्वतोभद्रमंडलं कुर्यात् यथा सममेकोनविंशत्या विभजेद्वेदिकां ततः अधरोर्ध्वं च तिर्यक् च ऋजुरेखाश्च तावती १ कुर्यात्कोष्ठाष्टादशकं स्यादूर्ध्वे तिर्यगेव च कोणतत्पार्श्वकोष्ठं तु रेखामार्जनतस्त्रयं २ एकीकृत्य सितैः शालीचूर्णैः पूरयेत्ततः तत्पार्श्वे कोष्ठमेकं तु त्यक्त्वायो कोष्ठपंचकं ३ तदूर्ध्वे त्रितयं तस्मादूर्ध्वमेकं तथाखिलं कोष्ठानां नवकं चैवमेकीकृत्य च कुंकुमैः ४ आपूरयेत्प्रतिदिशं द्वयं संभूय चाष्टकं श्वेतवर्णात्कोणकोष्ठादंतः सर्वत्र पंचवे ५ कोष्ठानि कोणसूत्रस्थान्यापूर्या सितचूर्णकैः कोणस्य पार्श्वकोष्ठोर्ध्वं पंचकं कोणसूत्रगं ६ तत्पार्श्वत्यक्तकोष्ठेन षट्कोष्ठं कोणसूत्रगं कोष्ठैकादशकं चैवमेकीकृत्य च सर्वतः ७ हरिद्वर्णैर्बिल्वपत्रचूर्णैः पूरयेत्क्रमात् शोणकोष्ठांतरालस्थकोष्ठयुग्मं तदूर्ध्वतः ८ क्रमाच्चतुष्टयं षट्कं षट्कं कोष्ठचतुष्टयं युग्मं संभूय कोष्ठानां चतुर्विंशतिसंख्यकं ९ एवं प्रतिदिशं चैकीकृतं तंडुलचूर्णकैः श्वेतैरापूरयेत्पश्चात्षट्त्रिंशत्संख्यकोष्ठयुक् १० चतुरस्रतया मध्ये क्षेत्रमुर्वरितं भवेत् परितस्तस्य कोष्ठानामेकीकृत्य तु विंशतिं ११ हरिद्राचूर्णपूर्णां तां वीथिकां परिकल्पयेत् एवं चां-

श्रीः
१

तःषोडशांककोष्ठानांपरिशोषिकं १२ तत्रसिंदूररजसासंपूर्यचततःपरं पार्श्वद्वयेषष्ठभागंत्यक्त्वामध्यात्तुकर्कटं १३ परिभ्राम्यसुवृत्तंवैनिष्पाद्य
प्राग्दिगादितःचिह्नषट्कंवृत्तरेखामध्येसमविभागतः १४ दक्षिणोत्तरयोरंतरालयो लम्यशाहीनतः तिर्यग्रेखाद्वयंकृत्वापूर्वरेखाद्विपार्श्वतः १५
वृत्तसंस्पर्शयोगेनप्रत्यक्चिह्नेनियोजयेत् त्रिकोणंजायतेचैवंप्रत्यग्रेखाद्विपार्श्वतः १६ आकुंचिह्नयोजनात्प्राचीमुखंत्र्यस्रंतथापरं षडस्रंच
द्विडमरुसंधिषट्कसुशोभितं १७ प्रत्यग्रेखामध्यचिह्नात्प्राग्रेखासंधियोगतः रेखायुग्मंवृत्तयुक्तंतिर्यग्रेखांतयोस्तथा १८ भवेत्तेन-
त्रिकोणंवैपश्चिमाभिमुखंपरं बहिःपद्मंचाष्टदलंमध्येयोनौचबिंदुकं १९ सितरेखायुतंचैवनवयोनिंप्रकल्पयेत् पूरयेन्मेखलाबाह्या
सितरक्तासितैःक्रमात् २० अंतरालेषुसर्वत्ररेखांकुर्यात्सितेनतु सर्वतोभद्रकंचैवंनवयोनियुतंभवेत् २१ एवंसर्वतोभद्रमंडलंकृत्वा विता
नकदलीस्तंभतोरणफलपुष्परंगवल्यादिभिर्वेदिकांगृहंचालंकृत्य वेदिकेशानभागेनातिदूरतःचतुरस्रादिकंकुंडान्यतमंहस्तमात्रंमे-
खलायोन्यादिसहितं अंगुलिद्वयोन्नतांसमचतुरस्रांवेदिकांवाहोमार्थंकुर्यात् ततःदीक्षासामग्रींसंपाद्यसंकल्पंकुर्यात् सामग्रीतु ना
रिकेलंसजलंसद्यवाज्ञयंवा १ सुवर्णरौप्यताम्रमृन्मयान्यतमंसपिधानपात्रमछिद्रंअस्फुटितंकलशपंचकम् २ प्रत्येकंकलशानांव-
स्त्रयुग्मंआचार्यब्रह्मसदस्यानांवरणायप्रत्येकंवस्त्रयुग्मं आचार्यादिपूजनायच सुवासिन्यैच व्रीहियवगोधूममाषतिलात्मकपंचधा
न्यंप्रत्येकंप्रस्थमितं ४ पंचरत्नानि ५ त्रिकोणबिंदुयुक्तप्रतिमापंचकं ६ श्वेतसूत्रं ७ चंदनागरुकर्पूरकचोरगोरोचनाकेसरजटामांसीशिला
रसाख्यशात्यष्टगंध ८ रक्तपट्टवस्त्रं ९ पंचामृतंपंचगव्यं ११ वटाम्राश्वत्थोदुंबरपनसात्मकपल्लवैःपंचकंसोमवल्लीदूर्वा १२ त्वक्पंचकं द
१३ नदीसंगमराजद्वारवल्मीकगजस्थानाश्वस्थानात्मृत्पंचकं १४ संवित् १५ त्रिगुणसूत्रद्वयं स्रुक्स्रुवयोः शोडशगुणंरत्नासूत्रं १६ सिद्धार्थाः
१७ चंदनं कर्पूरं जटामांसी अश्वत्थत्वक् रोचना भृंगराजं विष्णुक्रांता सहदेवी शमी लज्जालुरित्येषां दिग्भूतेंद्वग्निवेदाब्धिरामपक्षश
रैदंवः वर्णौषधीनां भागास्युर्माषान्यूनप्रमाणतः अत्रयस्याऽलाभःतत्स्थानेचंदनंस्यात् इतिवर्णौषधदशकं १८ दूर्वावटपत्र ग

२ ड्ची औडुंबरसमित् सोमलताइतिप्रादेशमितं अष्टोत्तरशतं अष्टविंशतिसंख्याकं वासमित्पंचकं प्रत्येकं १९ कुशाः २० पालाशप
रिधित्रयंहस्तमितंपालाशसमित्पंचकंमेक्षणार्थमेकं क्षीरवृक्षोद्भवंदंतकाष्टंच २१ सुगंधिद्रव्याणि २२ सुगंधितैलं २३ पात्रपूरणायसुव-
र्णखंडं पुष्पादिपूजासामग्री। ततः संभृतसंभारः साधकः दीक्षादिनौ पूर्वदिने पूर्वदिनेवा कृतनित्यक्रियः सुगंधितैलाद्यभ्यंजनस्नानं
विधाय शुक्लवाससीपरिधाय भूषणाद्यलंकृतगात्रः कृताचमनः पवित्रपाणिः भक्तिभावयुतः प्रसन्नचित्तः गुरुं साष्टांगं प्रणम्य तच्चर-
मा णौशिरसासंगृह्य भोस्वामिन् गुरुनाथार्यमार्त्तंडशरणागतं संसारसागरात्तीर्णं कृपयाकुरुमांगुरो इतिगुरुंपरशिवबुद्ध्याप्रार्थ-
येत् ततपूर्वमुखसाधकः आसने उपविश्य प्राणानायम्य गुरुं गणपतिं इष्टदेवतां नत्वा देशकालौ अष्टांगस्थितिंचोल्लिख्यामुक
गोत्रः अमुकवेदांतर्गतामुकशाखाध्यायी अमुकशर्माहंसमस्तदुरितक्षयद्वाराश्रीकामेश्वरीप्रीत्यर्थंपरदेवतापूर्णोपासनयोग्यता
सिध्यर्थंपरदेवतासन्मार्गप्रवर्त्तनार्थंचश्रीविद्यापूर्णदीक्षायहणंकरिष्येइतिसंकल्प्य ततः निर्विघ्नपरिसमाप्त्येगणेशपूजनंविधाय
ततपुण्याहवाचनंनांदीश्राद्धंचकुर्यात् तच्चवैदिकंतांत्रिकंवाकर्त्तव्यं वैदिकंतुस्वसूत्रादितोज्ञेयं तांत्रिकंयथा एतत्कर्मांगंपुण्या
हवाचनंकरिष्येइतिसंकल्प्य क्वचित्पात्रेप्रस्थमिततंडुलोपरिस्वस्तिकंविधाय तत्रपूर्वोक्तान्यतमंपात्रंत्रिगुणतंतुवेष्टितंगं-
धाद्यलंकृतंसुधूपितंप्रणवेननिधाय ४ह्रांहृदयायनमइतिशुद्धजलेनापूर्यरत्नपंचकंपंचरत्नमंत्रेणनिक्षिप्य पंचपल्लवै
र्मुखमाच्छाद्य तदुपरिसजातीयपात्रंतंडुलपूरितंनिधाय तत्रवंवरुणायनमइतिवरुणमावाहनादिभिः संपूज्य आपोहिष्ठाम·३
।४हिरण्यवर्णाःशुच·४।४पवमानःसुवर्जः·मोर्जयंत्यापुनातु ४रौंझ्रंक्ष्वौंज्रंसः इत्यभिमंत्र्य अमृतीकरणनिर्विषीकरणेकृत्वा द
र्व्यातदुदकमादाय अनेश्वरीप्रीयतां इत्युत्सृज्य चतुरोब्राह्मणान्संपूज्य अस्मिन्कर्मणि पुण्याहमस्त्विति प्रार्थ्यास्तुपुण्याह शिवः
मितितैरुक्तः वरुणंप्रणम्योद्वास्य तदुदकेनात्मानंसंभारान्दीक्षामंदिरंचप्रोक्ष्यमूलगायत्रीमष्टवारंजपेदितिपुण्याहवाचनवि- २

धिः ततः नांदीश्राद्धंकरिष्येइतिसंकल्प्य यथाशक्तिहिरण्यंब्राह्मणत्रयभोजनपर्याप्तान्यूनंसोदकंहस्तेगृहीत्वा हिरण्यगर्भ० प्रयच्छमे इदंहिरण्यंनांदीमुखदेवताप्रीत्यर्थंदातुमुत्सृजेदितिब्राह्मणेभ्योदद्यात् ततः आचार्यमासनादिभिःसंपूज्यवस्त्रदक्षिणाभरणफलादिकमादायामुकगोत्रेत्यादि अमुकशर्माहं अमुकगोत्रेत्यादि अमुकशर्माणंदीक्षाकर्मकर्तुंकारयितुंचाचार्यत्वेनत्वामहंवृणे इत्यादि पादमूलेनिधाय प्रणमेत् गुरुर्वृतोस्मिकरिष्यामीतिप्रतिवदेत् ततब्रह्माणंसदस्यंचतथैववृणुयात् अशक्तः ब्रह्माणमेकंवाश्रय वाकूर्चेब्रह्माणंपूजयेत् तत्राचार्यपदस्थानेब्रह्मादिपदस्योहः अथैवंवृतोगुरुः द्वारपूजांविधायापसर्पंत्वित्यंतंप्रविश्य वायव्यनैर्ऋतदिक्कोणेषु वास्तुपुरुषंक्षेत्रपालंतिरस्करिणीं ॐवंवास्तुपुरुषायनमः ॐक्षेंक्षेत्रपालाय० इतिमंत्राभ्यांतिरस्करणीमंत्रेण चसंपूज्य वेदिकाचतुर्दिक्षु दीपचतुष्टयंएकंवासंस्थाप्य ॐदींदीपनाथायनमः इतिसंपूज्य मंडपांतः ॐभूः वीक्ष्य ॐफट्इतिप्रोक्ष्य ॐफट्इतिकुशैःसंताड्य ॐहुंइतिपुनःप्रोक्ष्य सुधूपैर्धूपयित्वासिद्धार्थान्कुशानस्त्रेणसप्तवारमभिमंत्र्यतान्मंडपांतर्विकीर्य अस्त्रमंत्रितकुशमुष्टिनातान्संमार्ज्यैशानकोणेएकीकृत्यवेदिकापश्चिमतः षट्त्रिंशदंगुलंस्थलंपरित्यज्य तत्रभूमौचतुरस्रमालिख्यपूर्वरेखामध्ये ह्रीं चतुरस्रमध्ये क्लीं कोणेषुवंआगाघष्टदिक्षु अकचटतपयशाः ष्ववर्गानालिख्य तत्रयंपरकूर्मायनमइतिसंपूज्य तत्रपूर्वोक्तक्रमेणभूप्रार्थनपूर्वकंप्राङ्मुखआसनेउपविश्य भूतशुद्ध्यादिषडंगन्यासांतंकृत्वा वक्ष्यमाणपंचांबादिन्यासाष्टकंचकृत्वा वेदिकापश्चिमतः वक्ष्यमाणरीत्याश्रीचक्रंसंस्थाप्यसामयिकपूजांतांसपर्यांकृत्वा उद्वासनवर्जितांपूजांसमाप्य तत्रदेवतोत्तरतः सशिष्यः देवतांहृदिध्यायन्कुशेषुशयनंकुर्यात् इतिप्रपूर्वदिनकृत्यं परदिनेकृतनित्यक्रियः द्वारपूजादिन्यासांतंकृत्वाप्राणानायम्यदेशकालौसंकीर्त्य अमुकस्यदीक्षाकर्मांगंकलशस्थापनादिकंकरिष्येइतिसंकल्प्य दिनद्वयपक्षेन्यासाष्टककरणोत्तरंसद्यःसंकल्प्यपुष्पांजलिमादाय ॐयंचतुःषष्टियोगिनीयुतचतुःषष्टिसिद्धेभ्योनमःइतिसर्वतोभद्रमंडलंसंपूज्यपंचोपचारै

5

सौ·क·४

३ रभ्यर्च्य ततःआगादिमध्यांतंधान्यपंचकंक्रमादुपर्युपरिनिक्षिप्य सप्तविंशतिकुशमयंकूर्चंमध्यपुंजोपरिआगाग्रंनिधाय तत्रआगादिपुंजानेकरू
पेणदेवतापीठात्मकंध्यात्वा मंडूकादिपीठंसंपूज्य तत्रआगादिक्रमेणकलशचतुष्टयंमध्येमहाकलशंअभ्यदालितंत्रिगुणतंतुवेष्टितंसुधूपितं
गंधाद्यलंकृतं ४मू·संस्थाप्य वेदिकांकुशैःपरिस्तीर्यपंचरत्नानिकलशेषुतन्मंत्रेणनिक्षिप्य पंचत्वक्पंचौषधकषायितजलैःसुवासितगंगा
दितीर्थोदकैश्च बिंदुयुक्तविलोमवर्णान्मूलंचोच्चरन्क्रमात्प्रत्येकमापूर्य दूर्वापंचपल्लवसोमलताःकलशमुखेषुनिक्षिप्य तंदुलपूर्णा
छादनचषकान्कलशसमानजातीयान्नारिकेलादिफलयुतान्तदुपरिनिधाय कलशान्प्रत्येकंवस्त्रयुगलेनवेष्ट्य कलशपीठयोरै सं
क्यंध्यात्वा वेदिकोत्तरतःआगाग्रेषुकुशेषुप्रत्येकंपंचगव्यंपंचमृत्तिकाःसंविदंभस्मरक्षांचसंस्थाप्य चक्रप्रतिष्ठाप्रकरणोक्तपंचगव्य
मंत्रैःपंचगव्यंसंयोज्य सद्योजातपंचकमूलाभ्यामभिमंत्र्य अमृतीकरणादिचतुष्टयंकृत्वा मृ·अष्टकेनमृदमभिमंत्र्य बालामातृका
भ्यांसंविदंअमृतीकरणादिभिःत्र्यंबकाष्टकेनरक्षांसद्योजातमूलाभ्यांभस्मचाभिमंत्र्य चक्रप्रतिष्ठोक्तप्रकारेणकृताग्न्युत्तारणप्रतिमां
क्षीरेणाभिषिच्यकलशोपरिमूलेनाभिमंत्र्यक्रमात्स्थापयेत् ततःवेदीपश्चिमतःद्वादशांगुलमध्येचक्रराजंपीठोपरिनिधाय पूजाप्रक
रणोक्तरीत्यासंकल्पादिउपचारपूजांतंकृत्वा पूर्वकुंभमध्येशुद्धविद्यांतद्दक्षिणतःबालांवामतःराजमातंगीं पुरतःतत्समयविद्या
मावाहनादिषोडशोपचारैरभ्यर्च्य एवंदक्षिणपश्चिमोत्तरकलशेषुसौभाग्यविद्यांवाराहींतिरस्करिणीं लोपामुद्रांभुवनेशीमन्न
पूर्णांतुरीयांमहार्घ्योअश्वारूढांतत्समयविद्याश्चाभ्यर्च्य मध्यकलशेपराप्रासादविद्यांपरांपराशांभवीं पराप्रासादपुरतःषोडशी
तत्पुरतःऊर्ध्वाम्नायसमयदेवतां तत्पुरतःअनुत्तराम्नायसमयदेवतांसंपूज्य पूर्वादिकलशांस्पृशन् पूर्वाम्नायादिमंत्रान्प्रजप्य म
ध्यकलशेऊर्ध्वाम्नायानुत्तराम्नायमंत्रान्नित्यापंचपंचिकासमयदेवतांविद्यागायत्रीमंत्रांश्चप्रजप्य श्रीचक्रकलशेषुपरदेवता
मेकरूपांसंचिंत्य तांयथाविभवतःमहोपचारैःसंपूज्य श्रीचक्रेआवरणपूजांकृत्वा तत्तत्कलशेषुपूजितदेवताःतत्तन्मंत्रेणमु+ शिवः
खेचरीसंजीविनीदीपिनीमंत्रांश्च २

३

6

रव्यदेवतां त्रिवारं श्रीतीर्थेनऽन्यत्रदर्व्युद्धृतेन सकृत्संतर्प्य समष्टिरूपां देवतां श्रीतीर्थेनऽष्टोत्तरशतवारं संतर्प्य नैवेद्यं कृत्वा नित्यहो
मंच कृत्वा वेदिकाग्नीचयोर्दिक्षु बलिदेवताः संपूज्य आरत्यंतं कृत्वा दीक्षाहोमं कुर्यात् यथा दीक्षांग हवनं करिष्ये तत्रादौऽग्निसिद्धिं क
रिष्ये इति संकल्प्य कुंडादिपश्चिमतः आसनांते उपविश्य सामान्यकलशोदकं पात्रांतरस्थं पुष्पाक्षतादिपूजासामग्रीं च स्वसमीपे सं
स्थाप्य वीक्षणादिसंस्कारचतुष्टयं वेद्यादौ कृत्वा तत्र नमः इति दक्षिणमध्योत्तरेषु पश्चिमादिपूर्वांतास्तिस्रो रेखाः पश्चिममध्यपूर्वे
षु दक्षिणाद्युत्तरांतास्तिस्रश्च कृत्वा ॐ ऐं कुशोदकेन प्रोक्ष्य तासु रेखासु क्रमेण पूजयेत् ॐ विं विश्वेनमः ईं ईश्वराय· ॐ इं इंद्राय· ॐ ब्रं
ब्रह्मणे· ॐ यं यमाय· ॐ सों सोमाय· तत्र कुशेन चतुर्द्वारं चतुरस्रं मध्ये पश्चिमाग्रं त्रिकोणं विलिख्य तत्र मंडूकादिपीठं संपूज्य तत्र
पीठे कामेश्वरकामेश्वरीमूर्त्तिं ध्यायेत् यथा जपाकुसुमसच्छायमंकुशं पाशमेव च पुंड्रचापपुष्पशरान्बिभ्राणं पाणिपंकजैः
बालेंदुशेखरं नेत्रत्रयेणाभिमुखांबुजं स्वसमाकारकामेशीसंश्लिष्टं हृदि भावयेत् इति ध्यात्वा मूलस्य पञ्चषष्ट्यादिपूजांतं कृत्वा
स्थंडिलस्थयंत्रे आवाहनक्रमेणावाह्य प्राणप्रतिष्ठांतं कृत्वा देवतां सकामां ध्यात्वा संपूज्य अरणिसूर्यकांतपाषाणाद्युद्भूतं
श्रोत्रियागाराद्धृतं वाग्निं निर्धूमं ताम्रपात्रे मृत्पात्रे वा स्थितं ॐ फट् इत्यादाय तस्मादेकंऽङ्गारं क्रव्यादांशं निर्ऋतिकोणे ॐ फ
डिति परित्यज्य ॐ हुं इति समानपात्रेणाच्छाद्य ॐ मूः पुरतः संस्थाप्य वीक्षणादिसंस्कारचतुष्टयं कृत्वा ॐ उमित्यभिमंत्र्य अमृती
करणादि कृत्वा जानुभ्यामवनिं गत्वा तत्पात्रं स्थंडिलोपरि त्रिर्भ्राम्य ॐ उं इति कामेश्वरीयोनौ कामेश्वरबीजरूपं ध्यायन् स्वा
भिमुखमग्निं निक्षिप्य कामेश्वरीकामेश्वरयोऽराचमनं दत्वा स्वनाभौ जाठराग्निं संचिंत्य बिलस्थशिवाग्निसंयोजनक्रमे
मू॰ णावाह्याग्नावावाह्य ॐ अं सोहं वह्निचैतन्याय नमः इत्यभिमंत्रेणानवह्निचैतन्यं संयोज्य ॐ क्लीं वह्निमूर्त्तये नम इति प्रो
क्षित कुशकाष्ठशकलादिकं वह्नौ निक्षिप्य ॐ चित्पिंगल हन २ दह २ पच २ सर्वज्ञाज्ञापय स्वाहा इति वंशनलिकया फूत्कृ

7

स्यप्रज्वाल्य उत्थायकृतांजलिः ४ अग्निंप्रज्वलितंवंदेजातवेदंहुताशनं सुवर्णवर्णममलंसमिद्धंविश्वतोमुखं ततः उपविश्य
४वैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहा इत्यग्निमंत्रेणप्राणानायम्य अस्यश्रीअग्निमंत्रस्य भृगुः गाय
त्रीछं· अग्निर्दे· होमेविनियोगः रांरीमित्यादिन्यासः अग्निंत्रिकोणमरुणंपद्मस्थंशुक्लवाससं शक्तिपद्माभयवरहेमभूषायुतंस्म
रेत् दत्तोर्ध्वाघर्घः पर्यंतमायुधानि मानसैः संपूज्य वेदिकोत्तरतः प्रागग्रेषुकुशेषु स्रुक्स्रुवौ आज्यस्थालीचरुस्थालीप्रणीता
प्रोक्षणीपात्रेपरिधित्रयंसमित्पंचकंमेक्षणंत्रिगुणसूत्रद्वयंघृतंपवित्रत्रयंदूर्वादिपंचकंतिलांश्चसादयित्वा तत्रस्रुगादिषट्पा
त्राण्यधोमुखानिस्थापयेत् ततः सामान्यतोयेनोत्तानानिपात्राणिप्रोक्ष्यप्रणीतापात्रमादायप्रक्षाल्यस्वपुरतः कुशेषुसंस्थाप्यउदके
नापूर्यगंधपुष्पादिभिः संपूज्य तत्रोदगग्रंपवित्रंनिधायत्रिरुत्पूय पवित्रमध्येनतदुदकबिंदुपात्रपूर्व[illegible]तोनिक्षिप्य तत्रघृतबिंदुंदत्वा
पाणिभ्यांतत्पात्रंनासिकासममुद्धृत्य उत्तरतः कुशेषुसंस्थाप्यकुशैराच्छादयेत् एवंप्रोक्षणीपात्रेउत्पवनांतंकृत्वा तस्मिन्प्रणीताजलं
किंचिन्निक्षिप्यहोमोपकरणानिप्रोक्ष्य तत्पात्रंविभागोदकयुतंप्रणीतापूर्वभागेकुशेषुनिधाय मूलव्यष्टिसमष्टिभिः परिषिच्य गर्भर-
हितकुशैः चतुष्टयान्यूनैः प्राक्पश्चिमयोरुदगग्रंदक्षिणोत्तरयोः प्रागग्रंप्राक्पश्चिमपरिस्तरणाग्रमूलोपरिस्थिताग्रमूलमुदग्दक्षि
णपरिस्तरणस्ययथाभवतितथापरिस्तीर्य पश्चिमदक्षिणोत्तरेषु उत्तरपूर्वाग्रक्रमेण परिस्तरणवत्स्थूलमध्यसूक्ष्मान्परिधीन्नि
धाय ४ब्रंब्रह्मणेनमः ४विंविष्णवे· ४रुंरुद्राय· इतिक्रमेणतेषुसंपूज्य कुंडपक्षेपश्चिमपरिस्तरणात्किंयोनिमध्यगतमध्यमेख
लास्थितछिद्रप्रवेशगत्याकर्तव्यं ततः अग्नेर्दक्षिणतः कुशेषुदीक्षितंब्राह्मणमुपवेश्य दीक्षाहोमकर्मणिब्रह्माणंत्वांवृणेइ
तिवरणंकृत्वासंपूज्यप्रणमेत् ब्राह्मणाऽलाभेकुशबटुंवासंपूजयेत् अथाग्नावष्टदलपद्मंध्यात्वा आग्नादिदलेमध्येच ४पी
पीतायेनमः ४श्वेंश्वेताये· ४अंअरुणाये· ४कंकृष्णाये· ४धूंधूम्राये· ४तींतीव्राये· ४स्फुंस्फुलिंगिन्ये· ४रुंरुच्ये· ४ज्वांज्वालि

न्ये॰ ४ रं रं सर्वतत्वकमलासनायनमः इतिसमष्टनासंपूज्य तत्पीठे उक्तध्यानेनवह्निंध्यात्वा आवाह्य षण्मुद्राः प्रदर्श्य वह्निं आसनाद्युपचारैस्तांबूलांतैः संपूज्य अर्घ्याद्युदकेनप्रज्वलनं तु ततः गंध ध्याकुंडाद्बहिः पात्रांतरेकुर्यात् ततः आज्यस्थाली ४फट् इतिप्रक्षाल्यस्वपुरतः कुशेषुनिधायतस्यांपवित्रांतर्हितायामाज्यंनिक्षिप्य वीक्षणादिचतुष्टयंकृत्वा त्रिर्भूः अभिमंत्र्य अग्नतीकाणदिक्कृत्वा उत्तरतः अंगारेषु ४नमः इत्यधिश्रित्य दर्भयुगलंप्रज्वाल्य स्वधांत्रामाज्येनिक्षिप्य पुनर्दर्भयुगलंप्रज्वाल्य आज्योपरि ॐ इति त्रिःपरिभ्राम्य पुनर्दर्भान्प्रज्वाल्याज्ये ४नमः इतिप्रदर्श्य सर्वदर्भशेषानग्नौनिक्षिप्याज्यमुदग्द्वास्यांगारान्प्रत्यूह्य उदकंसंस्पृश्य स्वपुरतोदर्भेषुनिधाय त्रिरुत्पूय मूलेग्रंथियुतकुशाद्वयेनाज्यंत्रिधाविभज्य कराभ्यांस्रुक्स्रुवावादाय अधोमुखावग्रतप्य कुशाग्रमूलमध्याग्रैः स्रुक्स्रुवयोर्मूलमध्याग्रंसंमार्ज्य उभयंवामहस्तेगृहीत्वाप्रोक्ष्य पूर्ववत्प्रतप्य कुशानुदकस्पृष्टानग्नौनिक्षिप्य वामहस्तस्थितमुभयंबालयाभिमंत्र्य ४नमः इतितयोः कंठेत्रिगुणसूत्रंत्रिर्वेष्टनबंधयेत् ततस्तयोःक्रमेण ४ह्रींनमः ४ह्रौंनमः इतिविन्यस्य पंचधासंपूज्य स्वदक्षिणतः कुशेषुसंस्थापयेत् ततः कुशाद्वयेनत्रिधाविभक्तमाज्यंवामदक्षिणमध्येषु इडापिंगलासुषुम्णात्मकंविभाव्य ४उं भूर्भुवःसुवः इतिदक्षिणभागात्स्रुवेणाज्यमादाय अत्र अग्नयेस्वाहेत्यारभ्य अग्नयेत्रिधेत्यंतं एकादशानांहुतशेषंस्रुवलग्नंप्रोक्षणीपात्रेक्षिपेत् ४अग्नयेस्वाहा तथावामभागादादाय ४सोमायस्वाहा मध्यादादाय ४अग्नीषोमाभ्यांस्वाहा इतिअग्नेर्दक्षवामोर्ध्वनेत्रेषु हुत्वा सर्वत्र अग्नयइदंनमम सोमायेदंनममेत्यादित्यागंवदेत् ४अग्नयेस्विष्टकृतेस्वाहा इतिमुखे हुत्वा इतिवह्नेर्नेत्रमुखोद्घाटनंविभाव्य ४भूःस्वाहा अग्नयइदं॰ ४भुवःस्वाहा वायवे॰ ४सुवःस्वाहा सूर्याये॰ ४भूर्भुवःसुवःस्वाहा प्रजापतयेदं॰ ४वैश्वानरजात॰ + यःस्वाहा इत्यग्नये॰ त्रिधा ततः अग्नेर्गर्भाधानंसंपादयामिस्वाहा एवंपुंसवनं२ सीमंतोन्नयनं३ जातकर्म४ नालछेदं५ कामाग्निरितिनामकरणं६ ततः पालाशसमित्पंचकंघृतप्लुतं कामेश्वरीकामेश्वराभ्यांस्वाहेतिहुत्वा तयोर्विसर्जनंकुर्यात् ततःपुनः उपनिष्क्रमणं७ अन्नप्राशनं८

सो·क·

५ चौलं ९ उपनयनं १० महाव्रतं ११ उपनिषद्व्रतं १२ गोदानव्रतं १३ समावर्त्तनं १४ विवाहं १५ इतिप्रतिकर्मतत्तन्नाम्नासंपादयामि
स्वाहा इतित्रिस्त्रिरग्नयेहुत्वा ४ ह्स्रूं हिरण्यायैस्वा·१।४ घ्रूं कनकायै·२।४ क्ष्रूं रक्तायै·३।४ म्रूं कृष्णायै·४।४ ल्ह्रूं सुप्रभायै·५।४
रंह्रूं अतिरक्तायै·६।४ य्ह्रूं बहुरूपायै·७ इतिसप्तजिह्वाहुतीर्हुत्वा चतुर्धास्रुचिस्रुवेणघृतमापूर्यस्रुवेणाधोमुखेनाच्छाद्य घोरास्याय
ध्वैश्वानर+ स्वाहावौषट् इत्यग्नयेहुत्वोपविश्य ततःस्रुवेण ४ ॐस्वाहा १।४ ॐश्रीं स्वाहा २।४ ॐश्रीं ह्रीं स्वाहा ३।४ ॐ+ ह्रीं क्लीं·४।४
ॐ+ क्लीं ग्लौं·५।४ ॐ ग्लौं गं·६।४ ॐ+ गंगणपतये·७।४ ॐ+ तयेवरवरद·८।४ ॐ+ रदसर्वजनंमे·९।४ ॐ नमेवशमानयस्वाहा १० इति
दशधाविभक्तेनमहागणपतिमनुनाहुत्वा ४ ॐ+ नयस्वाहा इतिपुनःचतुर्थी इतिअग्निसिद्धिं कृत्वा ततःचरुस्थालीं फट् इतिप्रो
क्ष्य तत्रमूलाष्टाभिमंत्रितंशालितंदुलप्रस्थमितं ४ फडितिमंत्राल्यनिक्षिप्यतत्रगोक्षीरमपिनिक्षिप्य अग्न्यावधिश्रित्य ४ हुमितिपात्रां
तरेणाच्छाद्य मेक्षणेनमूलेनमध्येमध्येअवघट्टयेत् सुस्विन्नंनातिकठिनंनातिशिथिलं श्रपयित्वा स्रुवेणाभिधार्य ४ हुमित्तिउत्तर
त तकुशेषूत्तार्य प्राणानायम्यसंध्यादिपूजांतंकृत्वावह्नौश्रीचक्रंविभाव्य मोहिन्यादिपीठशक्तीःसंपूज्य तत्रदेवतामूर्त्तिंध्यात्वा
वाहनादिषोडशोपचारैःसंपूज्यतिथिनित्यांसमस्तेत्यादिनादेवतांचसंपूज्य दर्व्यानीतश्रीतीर्थेनमूलदेवतांत्रिधावह्नौसंतर्प्य।
मूलेनस्रुवेणपंचविंशतिघृताहुत्यादेवतावन्ह्योर्वक्त्रैक्यंविभाव्य पुनर्नाडीसंधानार्थंएकादशहुत्वा ततःतिथिनित्यांषोड
शीसप्तदशीगुरुत्रयंषडंगानिहुत्वा भूपुरादिनवावरणदेवताःसप्तमाद्यावरणत्रयदेवतावा तत्तन्मंत्रेणहुत्वा पादुकयाचि
हुत्वा ततःदूर्वादिपंचकंघृताक्तंप्रत्येकमेकैकशःमूलेनहुत्वा दूर्वाहुतिसंख्ययाज्येनहुत्वा ततःसुवासिनीपूजांतंकृत्वा तरुणो।
ध्वासयुतःशिष्यमाहूय मूलाष्टकमंत्रितपंचमृत्तिकालेपनपूर्वकंसंस्नाप्य तथाभिमंत्रितभस्मनोद्धूलनपूर्वकंत्रिपुंड्रंकारयित्वा शिवः
रक्तपट्टवस्त्रेणदृष्टिबंधंविधाय तथामंत्रितपंचगव्यंसद्योजातपंचकेनत्रिःप्राशयित्वा दृष्टिबंधंविसृज्य त्र्यंबकेतिमंत्रेणभस्म। ५

घर्षणेन रक्षां त्रिः संस्कृत्य तां रक्तपुष्पेण सहवाराहीमंत्रेण पुंसां दक्षे स्त्रीणां वामे मणिबंधे त्रिर्वेष्ट्य बध्वा पुन दृष्टिबंधं विधाय मूलेसंवि
तृग्रहणं कारयित्वा दृष्टिबंधं विसृज्य कुंडपश्चिमतः स्वयमुदङ्मुखः आसने उपविश्य शिष्यं स्ववामे आसने प्राङ्मुखमुपवेश्य प्रोक्षणीपात्र
स्थसंपाताज्येन मूलेन तन्नेत्रयोरंजनं विधाय तच्छिरसि श्रीचक्रं विभाव्य नेत्रमार्गात् हृदि प्रविश्य तच्चैतन्यमाकृष्य निर्गत्य स्वात्मनि संयोजितं
विभाव्य षडध्वशोधनं कुर्यात् यथा शिष्यस्य पादादि कटिपर्यंतं ४ ह्रीं श्रीं हंसः कलाध्वश्रीपादुकां पूज· १ ततो नाभिपर्यंतं ४२ हं श्री
तत्वाध्वश्री· २ ततो हृदयांतं ४२ हंक १४ भुवनाध्व· ३ ततो ललाटांतं ४२ हं क्लीं वर्णाध्वश्री· ४ ततो मूर्द्धांतं ४२ हं ऐं पदाध्व· ५ ततः बिलां
तं ४२ हं ह्रीं मंत्राध्वश्रीपा· ६ इति कूर्चेन विन्यस्य ततः वामहस्तधृतकूर्चेन शिष्यं स्पृशन् घृताक्तैस्तिलैर्दक्षमध्यमानामांगुष्ठैः तत्तन्मं
त्रेण कलाध्वानं शोधयामि स्वाहा इति क्रमेणैकैकमंत्रेणाष्टधा हुनेत् एवं अष्टचत्वारिंशदाहुतीर्हुत्वा ततः मंत्राध्वानं पदाध्वनि वि
न लापितं तं वर्णाध्वनि ततः भुवनाध्वानं तत्वाध्वनि तं कलाध्वनि कलाध्वानं वर्णाध्वनि तं विसर्गे तमनुत्तरे तमात्मनि विलाप्य पुनस्तत्क्रमे
णोत्पन्नमखिलाध्वमयं शिष्यदेहं विभावयेदित्यध्वशोधनं ततः स्वात्मनि स्थितं शिष्यचैतन्यं स्वनेत्रद्वारात् तद्भुलरंध्रमार्गेण हृदि प्र-
विष्टं विभावयेत् ततः स्रुवेण ४ भूः स्वाहा अग्नयेइदं· ४ भुवः स्वाहा वायवे· ४ सुवः सूर्याय· ४ भूर्भुवः सुवः स्वाहा प्रजापतये इ· स्रुचि च
तुर्गृहीतं ४ इतः पूर्वं प्राणबु+ गुरुदेवतासमर्पितमस्तु गुरुदेवतायाइदं· सकृदवदानद्विरभिघारणमिति चतुर्गृहीतेन चरुणा ४
अग्नये स्विष्टकृते स्वाहा ततः स्रुचं आज्यफलपुष्पैरापूर्य स्रुवेणाच्छाद्योत्थाय स्रुगमूलस्पष्टनाभिः ४ भूः वौषडिति त्रिधा परदेव
तायै पूर्णाहुतिं हुत्वा उपविश्य देवीमग्नौ पंचोपचारैः संपूज्य देवतामुद्वास्य अग्निं पंचोपचारैः संपूज्य तं स्वजठरे उद्वास्य परिधि
परिस्तरणानि मूलेनाग्नौ निक्षिप्य अग्निं परिषिच्य प्रणीतायां प्रतिजलमिश्रणं कृत्वा सप्तवारमस्त्रेणाभिमंत्र्य तत्पात्रं चतुर्दिक्षु
पुरतश्च तज्जलं निक्षिप्य पुरतो निक्षिप्तजलेनात्मानं शिष्यं च प्रोक्ष्य ब्राह्मणान् दक्षिणादिभिः संतोष्योद्वास्य होमं देवतायै समर्पयेत्

६
अ

इतिहोमविधिः ततःसामयिकान्संपूज्य शिष्यंस्वदक्षिणातउदङ्मुखमासनेउपवेश्य श्रीपात्रतीर्थेन ४ॐआत्म पाशंछेदयामिस्वाहा ४क्लींविद्यापाशंछेदयामिस्वाहा ४सौःकर्मपाशंछेदयामिस्वाहा इतिपाशछेदंकृत्वा पूजांदेवताविसर्जनरहितांसमाप्य सामयिकैः सहभुक्त्वाभुक्तकृतशेषस्यशिष्यस्य कृताचमनस्यहस्ते धनमस्यभिमंत्रितदंतकाष्ठंदद्यात् ततःशिष्यःतेनकाष्ठेनदंतान्संशोध्य गंडूषणानिकृत्वा तत्काष्ठंप्रक्षाल्यपरित्यज्यहस्तप्रक्षालनपूर्वकं आचमनंकुर्यात् ततोगुरुस्तेनशिष्येणशिखामंत्रबद्धशिखेनसहदेवतोत्तरतःकुशेषुशायीतेति ततःपरेद्युःप्रातरुत्थायकृतनित्यक्रियःतथाभूतंशिष्यमाहूय पूजामंदिरद्वारेगुरुर्वदेत् आगच्छपुत्रतेऽभीष्टं किमस्तिकथयस्वनः रहस्यंकथयाम्यघनकस्यापिप्रकाशाय ततःशिष्यःकृतांजलिः भोस्वामिन्सर्वधर्मज्ञतथामानविचारय चिरकांक्षांतुयन्मार्गंतन्मेब्रूहिगुरूत्तम इत्युक्त्वाप्रणमेत् ततःशिष्येणसहांतःप्रविश्यपूर्वमुखंशिष्यमासनेउपवेश्यस्वयमुदङ्मुखउपविश्य न्यासस्कंधेवक्ष्यमाणाष्टत्रिंशत्कलान्यासंतद्देहेकृत्वा ततःश्रीचक्रेआवाहनरहितां पूजांसुवासिनीपूजांतांकृत्वादीक्षांकुर्यात् तत्रादौवर्णदीक्षा गुरुमातृकान्यासोक्तप्रकारेणशिष्यदेहेमातृकोत्पत्तिं तत्तदंतर्मातृकास्थानेषुतत्तद्वर्णान्विभाव्यमातृकामुपदिशेत् इतिवर्णदीक्षा अथकलादीक्षा तत्रशिष्यस्यपादादिजान्वंतं ४निवृत्तिकलायैनमः१ ततोनाभ्यंतं ४प्रतिष्ठाकलायैनमः२ ततःकंठांतं ४विद्याकः३ ततोललाटांतं ४शांतिकः४ ततोबिलांतं४शांत्यतीताकः५ इतितत्तद्भावनपूर्वकं विन्यस्य ततःनिवृत्तिंप्रतिष्ठायांविलापयामीतिक्रमेणशांत्यतीतांपरमात्मनिविलाप्य पुनःपरमात्मनःशांत्यतीतामुत्पादयामीतिक्रमेणनिवृत्त्यंतोत्पादनंभावयन् कूर्चेनतत्तदंगंस्पृशेदितिकलादीक्षा अथस्पर्शदीक्षा तत्रगुरुःस्वहस्तकरतलेपरशिवरूपंस्वगुरुंध्यायन्शिष्यमूर्द्धिकरतलंमूलंषडंगंमातृकांचजपन्निक्षिपेदितिस्पर्शदीक्षा अथवाक्दीक्षा तत्रगुरुःपरशिवेचित्तंविधायतदुद्धृतान्समस्तमंत्रान्ध्यायन् तन्मयःस्वयंमंत्रानुपदिशा

शिवः
६

मीतिवदेत् इतिवाग्दीक्षा अथदृग्दी· तत्रगुरुःस्वनेत्रेनिमील्यस्वात्मरूपिणींमंत्राभिन्नांदेवतांध्यात्वाक्षणंनिरालंबमुद्रयास्थित्वाप्र
सन्नचित्तःदिव्यदृष्ट्याशिष्यमवलोकयेदितिदृग्दीक्षा अथवेधदी· तत्रगुरुःशिष्यस्यनेत्रमार्गादंतःप्रविश्यमूलाधारेचतुर्दलक
मलमध्यगतत्रिकोणमध्यस्थांकुंडलिनींध्यात्वाचतुर्दलस्यवादिसांतचतुर्वर्णशक्तिभिःसहकुंडलिनींतत्रस्थगणेशेनसहसंयो
ज्यसुषुम्णामार्गेणस्वाधिष्ठानेब्रह्मणावादिलांतार्णशक्तिभिश्चयुतंगणेशंसंयोज्यपुनस्तेनैवमार्गेणतंब्रह्माणंमणिपूरेडादिफां
तार्णशक्तिभिश्चयुतंविष्णुनासंयोज्यपुनस्तेनमार्गेणविष्णुमनाहतेकादिठांतार्णशक्तिभिर्युतंरुद्रेणसंयोज्य पुनस्तथारुद्रंविशु
द्धौअकारादिविसर्गांतशक्तियुतंजीवेनसंयोज्य पुनस्तथाजीवमाज्ञायांहक्षशक्तियुतंपरमात्मनासंयोज्य पुनस्तथैवतंबिंद्वर्धचं
द्ररोधिनीनादनादांतशक्तिव्यापिकासमनोन्मनाख्येषुक्रमेणनीत्वातत्रतत्रस्थितानेकशक्तियुतंपरमात्मानंपरशिवेगुरोर्ब्रह्मरं
ध्रस्थितसहस्रदलमध्यस्थचंद्रमंडलस्थेसंयोज्य तच्चंद्रमंडलगलदमृतधाराभिःशिष्यमाप्लाव्यशिष्यस्यदेहेपुनःपरशिवादुत्प-
न्नाःदेवताःक्रमेणतत्रतत्रस्थापयेदितिभावनयाकुर्यात् इतिवेधदीक्षा अथमंत्रदीक्षा पूर्वकलशेषुशुद्धविद्ययातत्समयविद्ययाचपु
ष्पांजलिद्वयंदत्वा शुद्धविद्यातत्समयविद्याभ्यांतदुक्तेनशिष्यंप्रोक्ष्यपूर्वाम्नायमंत्रान्क्रमेणोपदिश्य एवंदक्षिणपश्चिमोत्तरोर्ध्वा
म्नायांतमुपदिश्य ततःक्वचिच्छुभेदेशेरंगवल्यादिशोभितेपीठेशिष्यंप्राङ्मुखमुपवेश्यक्रमेणकलशपंचकंपंचभिःसुवासिनीभिर्ब्रा
ह्मणैर्वाआनीतंगुरुरेकैकंगृहीत्वा तत्कलशस्थितपल्लवानशिष्यमूर्ध्निनिधाय तत्तदाद्यविद्यासमयदेवताभ्यांतत्तत्कलशजले
नाभिषिच्य पराप्रासादविद्योर्ध्वाम्नायसमयदेवताषोडश्यनुत्तराम्नायसमयदेवताभिर्महाकलशेनाभिषिच्यधृतशुद्धवस्त्रंत्रिपुं
ड्रकृताचमनंपूर्ववद्देवतासमीपेउपवेश्यगुरुपारंपर्यांतमुपदिश्यन्यासादिपंचमुद्राप्रदर्शनांतंकारयित्वा संघट्टमुद्रामुपदिश्य·
दृष्टिबंधंकृत्वासंघट्टमुद्राविन्यासपूर्वकंमहापादुकामुपदिश्यदृष्टिबंधंविसृज्यअवशिष्टंमहावाक्यांतमुपदिश्य गायत्रीपंचप

13

सौ·क·४

७ चिकाःसमयदेवताः चक्रेश्वरीःशी षवि द्याःनित्याःकामेश्वर्यादिसप्तदशयंताःअंतपूजाउपदिश्य सर्वसंक्षोभणादिस्त्रियोदश शंखादिषो
उग्रामुद्राश्चोपदिश्य दृष्टिबंधंविधायमहाषोडशीमुपलक्षयेत् ततो दृष्टिबंधंविसृज्य गुरुजेष्ठान् गुरुंस्वज्येष्ठांश्चक्रमेणनत्वाकृतकृ
त्यात्मानंज्ञात्वायथाशक्त्यागुरुंपूजयेत् ततोगुरुरुपासकधर्मानुपदिशेत् देवतायांसदाभक्त्यावर्त्तितव्यंप्रयत्नतः देवतावद्गुरौ
शास्त्रेश्रद्धायोषित्सुनाप्रियं १ आचारगोपनंतत्साहीनतानुष्ठितिर्विधेः देवतार्थंचसर्वस्वमेतद्धर्माष्टकंभवेत् २ ततब्राह्मणांसस्स्वद
क्षिणादिभिःसंतोष्यप्रणमेत् ततंगुरुःसामयिकान्क्रमेणसंपूज्य शिष्यायतत्पात्रतीर्थेनमूर्ध्निप्रादिनाथादिगुरुतर्पणांतं हृदिदेव॰
तातर्पणांतंकारयित्वाशिष्यस्यकिमप्यंगंतेनैवस्पर्शयित्वा तदंगमातृकाद्यक्षरंद्व्यक्षरंत्र्यक्षरंचतुरक्षरंवापुंसामानंदनाथांतंस्त्री॰
णामंबांतंचनामकुर्यात् ततःतेननाम्नात्मपादुकांतर्पयित्वा तत्पात्रंदीक्षितायैशक्त्यैसमर्प्यवस्त्राभरणादिभिःतांसंपूज्य शेषंगृ
हीत्वायथासंप्रदायंगुरवेसमर्प्यपूर्णपात्रांतंकृत्वापात्रंप्रक्षाल्य सुवर्णादिभरितंपात्रंगुरवेसमर्प्यप्रणम्यसामयिकान्यथाक्रमंवस्त्राभर
णभोजनदक्षिणादिभिःसंपूज्यनमस्कुर्यादिति ततःपूजासमाप्त्यंतेदेवतायैकर्मसमर्प्यनत्वायथासुखंविहरेत् इतिशिवं अथमं
सिंदूर त्रदीक्षाप्रकारोलिख्यते पूर्ववत्सामग्रींसंपाद्यवेदिकायांश्रीयंत्रंरजसानिर्माय तत्रमध्येमहाकलशंपश्चिमाद्यष्टदिक्षुकलशाद्यष्ट
कंपूर्ववत्संस्थाप्यतेषुवशिन्याद्यष्टकंमध्येषोडशीं तत्पुरतःसौभाग्यविद्यांतद्दक्षिणतोबालांवामतोमहागणपतिंषोडशीदक्षिणवाम
योर्मंत्रिणींदंडिनींपृष्ठतःतिरस्कृतिंषोडशीपरितःवामावर्त्तेनत्रिकोणाकारेणनित्यामंडलंचतत्तन्मंत्रेणसंपूज्यकलशनवकेत्त
तन्मुख्यमंत्रमष्टधाप्रजप्यमध्यकलशेसौभाग्यविद्यां १ बालां २ महागणपतिं ३ मंत्रिणीं ४ दंडिनीं ५ तिरस्कृतिं ६ पंचदशनित्याः २१
चक्रेश्वरीःचतुःसमयदेवताःपंचपंचिकाःनवमुद्राःगुरुत्रयंकुलकामधेनुं तुरीयांवज्रेश्वरींतुरीयसमयदेवतांअन्नपूर्णां
अमृतेश्वरींसंजीवनींबटुकंपूर्त्तिविद्यांकामराजोद्दीपिनींचमत्कृतप्रजप्याध्वशोधनरहितंहोमंसमाप्यनवभिःकलशैःव एमः

७

शिन्यादिमंत्रान्षोडशींचजपन्नभिषिंच्य उक्तमंत्रानुपदिश्य नामकरणरहितंशेषंसमापयेत् संकल्पेपूर्णपदाभावः श्रीचक्रमंडलायनमः इ
तिमंडलपूजा पंचपल्लवेसोमलताभावः पादुकाहोमाभावः द्वितीयदिनेशिष्याह्वानप्रार्थनावर्णदीक्षाद्यभावः इतिमंत्रदीक्षा पंचदशीबी
जयोर्दीक्षातुमूलतंत्रादितोज्ञेयाग्रंथविस्तरभयान्नलिख्यते ॥ अथमंत्रग्रहणप्रकारः तत्रादौशिष्यःवस्त्राभरणदक्षिणाफलादिकंगृही
त्वागुरुंप्रणम्यप्रार्थयेत् ततःगुरुःतघंटेवाकलशेवायस्यमंत्रस्योपदेशःकर्त्तव्यस्तद्देवतांसंपूज्योपदिशेत् ततःशिष्यःयथाशक्त्यागुरुं
संपूज्यप्रणमेत् इति ॥ अत्राप्राप्तविषयस्यादौमहागणपतिंबालांगुरुत्रयंचोपदिशेत् समर्थेनतुबालादीक्षोक्तप्रकारेणदीक्षैवग्राह्या ए
वंप्राप्तबालाविद्योपदेशंबालादृढनत्युपासनाभिःपरिशुद्धचित्तंज्ञात्वा पश्चात्पंचदशींमंत्रिणींदंडनाथांपंचदशनित्यांतिरस्कृतिंचोप॥
दिशेत् समर्थेनतुबालादीक्षांपंचदशीदीक्षांमंत्रदीक्षांचगृहीत्वापूर्णदीक्षायाह्या बालादिदीक्षाग्रहणेबालादिसांगोपांगरक्षरूपंकर्त्तव्या
असमर्थेनतुपंचदश्यंतंमंत्रग्रहणविधिनागृहीत्वा पूर्णदीक्षाग्रहणंकार्यंइति एवंयथोक्तादीक्षैवाचार्यदीक्षासंक्रमणदीक्षेतिचोच्यते
असंक्रमणात्तुयथोक्तप्रकारेणैवकर्त्तव्या ॥ अयंतुविशेषः संकल्पेपरदेवतासन्मार्गप्रवर्त्तनार्थमित्युल्लेखोनास्ति ततोयावज्जीवंस्व
नान्यत्रशिष्यादावनुग्रहोनकर्त्तव्यइति इयमेवसाधकदीक्षेत्युच्यते अतिवैराग्यवताऽआचार्यलक्षणरहितेनवासायाह्येति इयंदि
प्पा विधौ[illegible]चारदीक्षा संस्काराख्यातुयावन्मंत्रोपदेशरहिता तत्रयोग्यतातारतम्यंज्ञात्वा महागणपतिं १ गुरुत्रयं ४ बालां ५ राजश्यामलां
६ वार्त्ताली ७ तिरस्कृतिं ८ सौभाग्यविद्यां ९ षोडशीं १० महापादुकां ११ महाषोडशीं १२ चोपदिशेत् ॥ अथवा गुरुत्रयं ३ बालां ४ सौभा॥
ग्यविद्यां ५ षोडशीद्वयं ७ महापादुकां ८ ॥ अथवागुरुनाममहाषोडशीं २ ॥ अथवाहृल्लेखां १ षोडशीकलांचेति २ अतिमूढादेःसंस्का
रदीक्षावतोमूलेनैवाखिलानुष्ठानं इयंचालस्योपहतेनकर्त्तव्या ॥ अपितुमूढादावेवकर्त्तव्या ॥ अत्रदीक्षायांयदिमहाविघ्नउत्पन्नं
स्तर्हिकलशेदेवतावाहनात्पूर्वंचेत्सर्वमुद्वास्यपुनःकालांतरेकर्त्तव्या ॥ आवाहनानंतरंचेत्देवतामनुद्वास्यविघ्नपरिहारःक

मो·क्र·४

८ र्तव्यः विघ्नपरिहारपर्यंतंस्वेनवान्येनवाप्रत्यहंपूजनंकर्तव्यं अतीतेविघ्नेऽप्रत्यावहितिदिनेएवप्रायश्चित्तानुष्ठापूर्वकंकर्मसमापनीयं गुरोरेवा-
चिरविघ्नेउत्पन्नेगुरुज्येष्ठकनिष्ठादिभिःकर्मसमापनीयं प्रायश्चित्तंतुयावद्दिनातिक्रमःतावत्सहस्रंमूलजपः तावच्छताज्यहोमोवास्वेनब्रा
ह्मणद्वारावाकर्तव्यः स्थापनोत्तरंकुंभोपघातेदशसहस्रंजपः सहस्रंहोमोवाकर्त्तव्यः यस्योपघातः तस्यपुनःसंस्थापनादिकंचकर्त्तव्यं अ
याशक्तयोपिरादिकर्तव्यदीक्षायांआचार्यवरणानंतरंउपाचार्यवरणंकार्यनिर्वाहार्थंकर्त्तव्यं तत्रदीक्षणंतुगुरुणैवकर्त्तव्यं गुर्वन्वारंभण
पूर्वकमुपाचार्येणाध्वशोधनंकर्त्तव्यं क्षत्रियस्यैवमेवदीक्षाकर्त्तव्या वैश्यस्यतुरहस्यविद्यांतमेवोपदेशः शूद्रस्यतुपादुकांमहाषोडशींवि
हायसंस्कारदीक्षैवकर्त्तव्या तत्रापियत्रमंत्रेप्रणवोस्तितत्स्थानेचतुर्दशस्वरंबिंदुकंदद्यात् इति स्त्रीणांतुयोग्यताक्रमेणसंक्रमा स९
संक्रमोभयविधापिविधवायाःस्त्रीभक्तियुक्ताया एव साप्यसंक्रमाख्यैवनाम्ना सुवासिन्यास्तुभर्त्रासहदीक्षाप्रशस्ततमा तत्रपृथगभ्यंगस्ना
दिसंकल्पमृत्तिकास्नानादिसेविकृणांतंघृताञ्जनंप्रणीतोदकप्रोक्षणंपाशच्छेदःकुंतशेषभोजनादिशिखाबंधांतंमंत्रदीक्षानामकरणं
च अन्यत्पत्नीसहितस्यभर्तुरेव एवंबहूनांशिष्याणांयुगपद्दीक्षाग्रहणेपि तत्रगणेशपूजनादिवरणांतंदूर्वादिहोमःअध्वशोधनक
लान्याससप्तविधदीक्षाश्चप्रत्येकंकर्त्तव्या इति दीक्षाक्रमः अथोपासकधर्मालिख्यंते एकग्रामेक्रोशाद्दूरेचार्द्धयोजनकेस्थितः गु
रोस्त्रिसंध्यैकसंध्यंपंचपर्वसुदर्शनं १ एकयोजनमारभ्ययोजनद्वादशावधि तत्तद्योजनसंख्यातैर्मासैस्याद्गुरुदर्शनं २ अतिदूरेन
मेच्छिष्यस्तद्दिशाभिमुखोगुरुं रिक्तहस्तोनैव [illegible] चिरात्सदृशेदेवंगुरुंतथा ३ नैवगच्छेन्मंडलेचफलाद्यादायवैव्रजेत् गुरौमनुष्यबुद्धिं
चमंत्रेचाक्षरबुद्धितां ४ नकुर्याद्यंत्रमूर्तौदौशिलाबुध्यादिकंतथा गुरुंपश्येत्सदाभक्त्यासाक्षाच्छिवमयंबुधः ५ शिवेरुष्टेगुरु
स्त्रातागुरौरुष्टेनकश्चन गुरोस्तस्माद्धितंकुर्याद्वाङ्मनःकायकर्मभिः ६ सर्वत्रादौगुरुःपूज्यःपश्चादन्यःपूज्यस्तदाज्ञया ऋणदानंत
थादानंतथैवक्रयविक्रयं ७ नकुर्याद्गुरुभिःसार्द्धंतदाज्ञांनैवलंघयेत् गुरुदैवतमंत्राणांसमयाचारवर्त्मनः ८ ननिंदांशृणुयात्क्वापि ८

रम:

16

नतिष्ठेत्तत्रसर्वथा शिरसानवहेद्भारंपादुकाभावनापरः ९ नाभिमानंगुरोःकार्येलज्जांकुर्यात्कदाचन गुरुमित्रसुहृद्दासीदासाद्यान्नाऽप
मानयेत् १० वाहनंपादुकांचैवचामरंव्यजनंतथा तांबूलभक्षणंसेव्यभावंगुर्वग्रतस्त्यजेत् ११ पादप्रक्षालनंदंतधावनंमलमूत्रयोः वि
सर्गक्षौरमभ्यंगंशयनंस्त्रीनिषेवणं १२ दुर्वाक्यंरोदनंहास्यंपरोद्घाटनंतथा दूषणंकलहंवादमधोवायुंदुराग्रहं १३ अंगभंगंनकुर्या
द्धिपूज्यसंमुखतःक्वचित् गुरोरासनवस्त्रांगछायांनोलंघयेत्क्वचित् १४ अधस्थेतुगुरावूर्ध्वंनतिष्ठेन्नाग्रगोभवेत् नविशेद्दुःस्थितेत
स्मिन्स्वांगछायांनपातयेत् १५ गुरुनामनगृह्णीयाजपात्स्यादृतेक्वचित् गुरुपत्नीसुतज्येष्ठान्गुरुवत्पूजयेत्सदा गुरोर्गुरौसमीप
स्थेगुरोर्नत्यादिमानसं १६ इतिगुरुभक्तिलक्षणं अथाचारः मंत्रंमुद्रामात्मनामशिष्यादन्यत्रनोवदेत् मत्तेभंसहकारंचाप्यशोकंपु-
ष्पितद्रुमं श्मशानंध्वजसौगंध्यमेकवृक्षंचकोकिलं सुवासिनीकुमारीणांसमूहंमदिरागृहं २ आममांसंकौलशास्त्रपुस्तकंदर्शने
नमेत् पशुहस्तगतंनैवकुर्याच्चकुलपुस्तकं ३ श्रद्धाभक्तिकराभ्यांतुकौलिकोभवसागरं तरत्येकेनहीनोपिगंभीरेमज्जतिध्रुवं ४ गु
रुशास्त्रप्रमाणोक्तंकुर्याद्वृत्त्यनुरोधतः आलस्येनत्यजन्नधःपतत्येवनसंशयः ५ कुलशास्त्रंसर्वदैवचिंतनीयंप्रयत्नतः पशुशास्त्रा-
णिसर्वाणिदूरतःपरिवर्जयेत् ६ पशोस्तुरक्षणंयद्वत्धर्मस्यस्यात्तथाचरेत् गुप्त्यर्थंकर्मणांलोपेनपापंविद्यतेक्वचित् ७ मातृदोषोयथा
गोप्यस्तथाधर्मस्त्वयंसदा योषितामप्रियंनैवकुर्यात्कार्यंप्रियंसदा ८ अपराधसहस्रेपिस्वस्त्रियंवापरस्त्रियं नक्रोशयेन्मंडलेतु
सर्वेषांप्रियमाचरेत् ९ काम्यकर्मनकर्तव्यंनित्यंनैमित्तिकंचरेत् भक्त्याज्ञात्याकृतंकर्मदेवतायैसमर्पयेत् १० अन्यमंत्रार्चनंश्र
द्धांनकुर्यात्तुकदाचन कुलशास्त्रंतथामंत्रंश्रोतव्यंगुरुवक्त्रतः ११ तदाज्ञयावासंपश्येद्गुरुंध्यायन्स्मरन्नमन् नग्नांस्त्रियमी
क्षेतकुरूपीप्रकटस्तनी १२ दृष्ट्वातुविवृतांवापिनोपहासंसमाचरेत् मंडलेतुस्त्रियायुक्तःताडितोपितुतांनमेत् १३ नस्वपे
त्कुलवृक्षाधः तत्पत्रेनैवभोजनं वृथाच्छेदंनकुर्याच्चनमस्कुर्याच्चदर्शने १४ श्लेष्मांतककरंजाम्रनिंबाश्वत्थकदंबकाः बिल्वा

सौ·क·४

९ वटोडुंबरश्चकुलवृक्षानवस्मृताः २५ कुलशास्त्रंसदाचारंकदापिनविकल्पयेत् गुरुस्त्रिवारमाचारंशिष्यायकथयेत्स्फुटं २६ तन्नगृह्णा
तिशिष्यश्चेत्तदापापंगुरोर्नहि बिभीतकार्ककारंजस्नुहीच्छायांनसंश्रयेत् २७ पुडूरूभक्षणंतद्वच्छेदनंचपरित्यजेत् गुरुंनगोपयेन्मं
त्रंसर्वथानप्रकाशयेत् २८ शपथंनैवकुर्वीतकार्येक्वापिकदाचन परंपरागुरुंनैवत्यजेद्योग्यंकथंचन २९ तदाज्ञामंतरातस्यचाग्रे
नोपविशेन्मनुं इतिसमयाचारः अथमंडलेकर्त्तव्यधर्माः हतांगोमलिनश्चापिमलिनांबरमूर्द्धजः आशौचांगस्तथास्मीषीकंचुकीकृ
तभोजनः १ पूजितांगस्तथोच्छिष्टमुखोमरणसूतकी अपस्मारीक्लेशयुक्तःछर्दतीमारोगवान् २ प्रायश्चित्तीतथाऽस्नातोनविशेन्मं
डलेक्वचित् सहून्मोहात्प्रविष्टोपिदेवताशापमाप्नुयात् ३ यदितेषांतुभक्तिःस्यादुत्कटादर्शनादिषु पूजागृहद्वारदेशाद्बहिःपूजादिकं
चरेत् ४ नमेत्पूजागृहद्वारेदंडवन्नतुमंडले स्नातःशुचिर्धौतवस्त्रोधृतपुंड्रःशुभाशयः ५ क्षालितांघ्रिकरोऽरिक्तकरोभक्त्याप्रण
म्यच आचार्याज्ञानुरूपेणमंडलांतर्विशेत्ततः ६ भावयन्देवतारूपंमंडलंप्रणमेद्बुधः पुष्पांजलिंततःकुर्याद्यथोक्तविधिना
क्रमात् ७ मंडलाकारतोवापिचतुरस्रतया[illegible]थावाऽऽचार्यमध्यतःकृत्वाविशेज्ज्येष्ठक्रमेणतु ८ ज्येष्ठेषुसत्सुनविशेदाचार्यस्यसमी
पतः आचार्योपितथाज्येष्ठानुत्थायप्रणिपत्यच ९ तेषामाज्ञांगृहीत्वैवस्वासनेथसमाविशेत् आरोसुवासिनीःपूज्याःकुमारीर्व
स्त टुकान्[illegible]था १० तीर्थंप्रदद्यात्तस्याश्चाद्ब्राह्मणानर्च्यवैक्रमात् तेभ्योपितीर्थंदद्याद्वैज्येष्ठेभ्योऽस्त्वायसाधकः ११ श्रीपात्रादीस्तितायै
स्यादन्येभ्योहेतुपात्रतः बटुकायबलेःपात्राद्देवताभावतोनमेत् १२ एवंपात्राणिसंगृह्यतर्पयित्वायथाविधिः फुल्लाशिवा
योक्रमतस्त्रिचतुःपंचपात्रकं १३ मत्तास्यपात्रंपुष्पादियुतमाघ्राय हस्ततः आचार्यापतनोद्द्वानमस्कुर्याच्चभक्तितः पात्रस्य
दानमादानंज्येष्ठेभ्योऽस्त्वायवैभवेत् स्वीकृत्यतत्प्रसादंवैजस्वास्तोत्रादिकंपठेत् १५ अर्घ्यस्थापनमारभ्ययावत्पात्रविसर्जनम्
सर्वंशिवमयंपश्येत्अन्यथापतनंभवेत् १५ ~~अर्घ्यस्थापनमारभ्ययावत्पात्रविसर्जनं सर्वंशिवमयंपरंपरे~~ सर्ववर्णाद्विजास्तत्र एमः

९

18

नभेदंचिंतयेत्क्वचित् उद्वासानंतरंनैक्यंकुर्याद्विद्वान्कदाचन १७ स्वात्मीकारस्त्रिधातत्रदिव्यवीरपशुक्रमात् उद्वासावधिदिव्यःस्यात्त
त्पश्चाद्वीरउच्यते १८ असंस्कृतःपशुःप्रोक्तोविप्राणामाद्यएवतु अपशुःक्षत्रियविशांशूद्राणांत्रितयंभवेत् १९ तत्तन्मंत्रेणपात्राणां
संख्यातानांकृतिस्मृता पश्चान्मूलंपादुकांवास्वाहांतंचपठन्कुनेत् २० तावदेवकुनेद्विद्वान्यावदानंदसंप्लुतः मनोनिश्चलतांया
तिचित्तंचापिप्रसादतां २१ यावत्सुप्रसन्नतानस्याद्विकारित्वमेवच तावदेवकुनेद्देविनिष्फलंत्वन्यथाभवेत् २२ आदौशक्तेःप्रसादं
वैतीर्थमादायसाधकः ज्येष्ठादाचार्यतःपश्चात्प्रसादंपुष्पखंडकं २३ अनंतरंतुभक्त्यावैशक्तीनांतुयथेच्छतः ज्येष्ठानामपिवी
राणांप्रसादंपुष्पखंडकं २४ तीर्थंवाप्यन्यदपिवातत्कृपाप्राप्तमेवच कुनेत्कुंडलिनीवह्नौभक्तिभावेनचेतसा २५ मातृश्वश्रुरूप
त्याश्चविधवायाअपिस्वयं प्राप्यप्रसादंतुकुनेद्यासौनकदाचन २६ स्वजेष्ठविधवायास्तुप्रसादंयद्विचार्पयेत् प्रेमभावेनतदपि
कुनेन्नतुनिषेधयेत् २७ आरंभस्तरुणश्चैवयौवनःप्रौढएवच प्रौढांतश्चोन्मनस्तद्वदात्यंतिकइतिस्मृतः २८ उल्लासःसप्तधा-
देवितत्रारंभःस्वसंख्यया ईषद्बोधस्तुतरुणोमध्यबोधस्तुयौवनः २९ यत्नान्मनोलयोयत्रचायत्नात्तुचलोलयः प्रौढइत्युच्य
तेचेषच्चलतीतुतदंत्यतः ३० उन्मनश्चलनंयत्नाद्यस्यानिश्चलत्वतः अशक्ताबुधबालानामारंभःपरिकीर्त्तितः ३१ तरुणो
नूतनानांस्याद्भक्तिमात्रस्तुयौवनः प्रौढस्यादारुरुक्षोर्वैमध्यारूढस्यतत्परः ३२ पूर्णारूढस्योन्मनश्चतद्वदात्यंतिकोपिवै शक्ती
नांतुयथेच्छंस्यादन्येषांदैषिकाज्ञया ३३ उल्लासभेदमज्ञात्वाप्राप्यमूढत्वमंबिके सयोगिनीनांसततंपशुस्यादन्यथापिबन् ३४
जिह्वालोलुपभावेनचेंद्रियप्रीणनायच यःपिबेत्तंतुतामिस्रेमातृकाःपातयंतिवै ३५ भावयेद्देवतारूपंतत्रशक्तिंविशेषतः अ
न्यथाभावयन्साधकःक्रुध्येत्तस्यतुदेवता ३६ भोगेच्छातुस्वशक्तौतुकुर्यादन्यत्रनैवहि तच्चापिनाचरेदन्येपूज्यानांतुकदाचन ३७ शा
क्तेरिच्छानुरोधेनकुर्यात्तेननदोषभाक् गुरोराज्ञानुरोधेनदेवताप्रीणनायच ३८ यत्करोतितुतत्सर्वंमोक्षायैवप्रकल्पयेत् अन्य

६३३६

१८ याक्रीयमाणंतुसर्वंदुःखायैवभवेत् ३९ सन्यासिनोवनस्थाश्चशांतरूपाउपासकाः ।आदावेवतुपूज्याःस्युःमंडलेशिवरूपिणः
४० शास्त्रगुर्वाज्ञयासर्वंसफलत्वायकल्पते ।अन्यथाविफलंसर्वंभस्मनीवयथाहुतं ४१ ।अयंहिपरमोयोगःकौलमार्गेमहेश्व
रि ।असिधाराव्रतसमःमनोनिग्रहहेतुकः ४२ स्थिरचित्तस्यसुलभःसफलस्तूर्णसिद्धिदः ।अन्यस्यविफलोदुःखहेतुस्यात्सुर
मेश्वरि ४३ एवमुपासकधर्मान्ज्ञात्वा उपासीतेतिशिवम् श्रीमाधवानंदनाथकृतेसौभाग्यपूर्वके कल्पद्रुमेसमभवत्स्कंधोदी
क्षाफलानतः ४४ इतिश्रीसौभाग्यकल्पद्रुमेदीक्षाविधिनामकचतुर्थःस्कंधः ४ लि·गणपतिलालेनभाद्रपदकृष्ण११सं·
१९२७

एमः
१०

KKSU LIBRARY
RAMTEK
441 106
M/1200
Dist. Nagpur

20

```
[OrderDescription]
,CREATED=20.10.20 14:55
,TRANSFERRED=2020/10/20 at 14:58:04
,PAGES=20
,TYPE=STD
,NAME=S0004237
,Book Name=M-1200-SHOUBHAGYA KANPDRAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

FILE20=00000020.TIF
,